# Shaivaprokta Shiva Stava

# શૈવપ્રોક્તઃ શિવસ્તવઃ

## Document Information

Text title : Shaivaproktam Shiva Stava

File name : shivastavaHshaivaproktaH.itx

Category : shiva, shivarahasya, stava

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 14 | 171-221||

Latest update : April 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2024

*sanskritdocuments.org*

# શૈવપ્રોક્તઃ શિવસ્તવઃ

સર્વોપનિષદામીશઃ પરમાત્મા સદાશિવઃ ।
ય એકો ભગવાનીશ ઈશાનીભિઃ સમીશતે ॥ ૧૭૧॥

સર્વાંલ્લોકાનીશતે ય ઈશાનીભિઃ સમીયતે ।
ઉદ્ભવે સમ્ભવે ચૈવ એક એવ શિવઃ પ્રભુઃ ॥ ૧૭૨॥

ય એવં વિદુરીશાનમસૃતાસ્તે ભવન્તિ હિ ।
એક એવ હિ રુદ્રોઽયં ન દ્વિતીયોઽયમીશ્વરઃ ॥ ૧૭૩॥

પાતિ હન્તિ પુનઃ સૃષ્ટ્વા પાતિ હન્તિ પુનઃ પુનઃ ।
વિશ્વતશ્ચક્ષુરીશાનો વિશ્વતોઽન્તર્મુખઃ શિવઃ ॥ ૧૭૪॥

વિશ્વતોબાહુરનઘો વિશ્વતસ્પાન્મહેશ્વરઃ ।
દ્યાવાભૂમી જનયન્નેક એવ સદાશિવઃ ॥ ૧૭૫॥

સ બાહુભ્યાં સમ્પતત્રૈર્ધમત્યેવ પુનઃ પુનઃ ।
પ્રભવશ્ચોદ્ભવશ્ચાસીદ્રુદ્રો વિશ્વાધિકો ઋષિઃ ॥ ૧૭૬॥

બ્રહ્મવિષ્ણ્વીશદેવાનાં યઃ સ એવ સદાશિવઃ ।
હિરણ્યગર્ભમેવાદૌ જનયામાસ શઙ્કરઃ ॥ ૧૭૭॥

વિષ્ણું ચ જનયામાસ તસ્માદ્વિષ્ણોઃ પરઃ શિવઃ ।
તતશ્ચેન્દ્રમુખાન્દેવાઞ્જનયામાસ શઙ્કરઃ ॥ ૧૭૮॥

તતો ભૂમિં તતો વાયું તતો ગગનમીશ્વરઃ ।
તતો નાનાવિધાઞ્જીવાન્સસર્જોમામહેશ્વરઃ ॥ ૧૭૯॥

તતઃ સમુદ્રાન્સરિતો ગિરીનપ્યોષધીન્પરઃ ।
ય એવ નિષ્કલઃ શાન્તો નિરવદ્યો નિરઞ્જનઃ ॥ ૧૮૦॥

સ એવોમાસમેતઃ સન્સૃજત્યવતિ હન્તિ ચ ।
તતઃ પરં બ્રહ્મ વરં બૃહન્તં સામ્બમેવ હિ ॥ ૧૮૧॥

યથા નિકાયં ભૂતેષુ ગૂઢં સર્વેષુ સર્વદા ।
એક એવ હિ રુદ્રોઽયં વિશ્વસ્ય પરિવેષ્ટિતા ॥ ૧૮૨॥

જ્ઞાત્વા તમીશમમૃતા ભવન્ત્યેવ સદાશિવમ્ ।
મહાન્તમેતં પુરુષં પરસ્તાત્તમસઃ પરમ્ ॥ ૧૮૩॥

આદિત્યવર્ણં વેદાશ્ચ ન જાનન્ત્યેવ શઙ્કરમ્ ।
શિવમેવ વિદિત્વાતિ મૃત્યુર્નૈતિ તમાત્મવાન્ ॥ ૧૮૪॥

ન વિદ્યતેઽયનાય સ્યાચ્ચાન્યઃ પ્રન્થાઃ શિવં વિના ।
તસ્માત્પરં નાસ્તિ પરં શિવાત્સર્વોત્તમોત્તમઃ ॥ ૧૮૫॥

નાસ્તિ કશ્ચિચ્છિવાજ્જ્યાયાનણીયોઽતસ્તમર્ચયેત્ ।
તેન પૂર્ણમિદં સર્વં પુરુષેણ શિવેન હિ ॥ ૧૮૬॥

તતો યદુત્તરતરં તદરૂપમનામયમ્ ।
ય એનં વિદુરીશાનમમૃતાસ્તે ભવન્તિ હિ ॥ ૧૮૭॥

દુઃખમેવાભિયાન્ત્યત્યે શિવધ્યાનપરાઙ્મુખાઃ ।
સર્વાનનશિરોગ્રીવઃ સર્વભૂતગુહાશયઃ ॥ ૧૮૮॥

સર્વવ્યાપી ચ ભગવાંસ્તસ્માત્સર્વગતઃ શિવઃ ।
મહાન્પ્રભુર્વૈ પુરુષઃ સત્ત્વસ્યૈકઃ પ્રવર્તકઃ ॥ ૧૮૯॥

સુનિર્મલમિદં શાન્તમીશાનો જ્યોતિરવ્યયઃ ।
અન્તરાત્માઙ્ગુષ્ઠમાત્રઃ પુરૂષોઽયં સદાશિવઃ ॥ ૧૯૦॥

સામ્બો જનાનાં હૃદયે સન્નિવિષ્ટો નિરન્તરમ્ ।
સર્વતઃ પાણિપાદં તત્સર્વતોઽક્ષિશિરોમુખમ્ ॥ ૧૯૧॥

સર્વતઃ શ્રુતિમલ્લોકે સર્વમાવૃત્ય તિષ્ઠતિ ।
સર્વેન્દ્રિયગુણાભાસં સર્વેન્દ્રિયવિવર્જિતમ્ ॥ ૧૯૨॥

સર્વસ્ય પ્રભુમીશાનં સર્વસ્ય શરણં સુહૃત્ ।
નવદ્વારે પુરે દેહે હંસો લીલાયયતે બહિઃ ॥ ૧૯૩॥

વશી સર્વસ્યભૂતસ્ય સ્થાવરસ્ય ચરસ્ય ચ ॥ ૧૯૪॥

અપાણિપાદો જવનો ગૃહીતા પશ્યત્યચક્ષુઃ સ શ ૃણોત્યકર્ણઃ ।
સ વેત્તિ સર્વં ન ચ તસ્યાસ્તિ વેત્તા તમાહુરગ્ર્યં પુરુષં મહાન્તમ્ ॥ ૧૯૫॥

અણોરણીયાન્મહતોમહીયાનાત્મા ગુહાયાં નિહિતોઽસ્ય જન્તોઃ ।
તમક્રતું પશ્યતિ વીતશોકો ધાતુઃ પ્રસાદાન્મહિમાનમીશમ્ ॥ ૧૯૬॥

વેદાહમેતમજરં પુરાણં સર્વાત્મના સર્વગતં વિભુત્વાત્ ।
જન્મનિરોધં પ્રવદન્તિ યસ્ય યદ્બ્રહ્મવાદિનો પ્રવદન્તિ નિત્યમ્ ॥ ૧૯૭॥

એકવર્ણઃ શક્તિયોગાદનેકો બહુધા શિવઃ ।
વર્ણાનનેકાનુમયા ગ્રહીતાર્થો દદાતિ હિ ॥ ૧૯૮॥

વિચૈતિ ચાન્તે વિશ્વાત્મા વિશ્વમાદૌ સ શઙ્કરઃ ।
સંયુનક્તુ સ નો બુધ્યા શુભયા દેવતોત્તમઃ ॥ ૧૯૯॥

સ્ત્રીરૂપઃ પુરુષાકારઃ સર્વાકારઃ સદાશિવઃ ।
કુમારાત્મા કુમાર્યાત્મા સર્વાત્મા વિશ્વતોમુખઃ ॥ ૨૦૦॥

નીલો ગૌરશ્ચ હરિતો લોહિતાક્ષઃ સદાશિવઃ ।
નિર્મલો નિયતો યન્તા નિરવદ્યો નિરાકૃતિઃ ॥ ૨૦૧॥

છન્દાંસિ યજ્ઞાઃ ક્રતવો વ્રતાનિ ભૂતં ભવ્યં યચ્ચ વેદા વદન્તિ ।
તસ્માન્માયી સૃજતે વિશ્વમેતત્ તસ્મિંશ્ચાન્યે માયયા સન્નિરુદ્ધાઃ ॥ ૨૦૨॥

માયાં તુ પ્રકૃતિં વિદ્યાન્માયિનં તુ મહેશ્વરમ્ ।
તસ્યાવયવભૂતૈસ્તુ વ્યાપ્તં સર્વમિદં જગત્ ॥ ૨૦૩॥

યો વૈ યોનિમધિતિષ્ઠત્યેકો યસ્મિન્નિદં સં ચ વિવૈતિ સર્વમ્ ।
તમીશાનં વરદં દેવમીડ્યં વિચાર્યેમાં શાન્તિમત્યન્તમેતિ ॥ ૨૦૪॥

યો દેવાનાં પ્રભવશ્ચોદ્ભવશ્ચ વિશ્વાધિકો રુદ્રો મહર્ષિઃ ।
હિરણ્યગર્ભં જનયામાસ જાયમાનં જાયમાનં ચ પશ્યતઃ ॥ ૨૦૫॥

વિષ્ણું ચ જનયામાસ જાયમાનં ચ પશ્યતઃ ।
ઇન્દ્રં ચ જનયામાસ જાયમાનં ચ પશ્યતઃ ॥ ૨૦૬॥

વહ્નિં ચ જનયામાસ જાયમાનં ચ પશ્યતઃ ।
વરુણં ચ જનયામાસ જાયમાનં ચ પશ્યતઃ ॥ ૨૦૭॥

યમં ચ જનયામાસ જાયમાનં ચ પશ્યતઃ ।
લોકાંશ્ચ જનયામાસ જાયમાનાંશ્ચ પશ્યતઃ ॥ ૨૦૮॥

ઈદૃશઃ સર્વગોપ્તા સ શોભનયા બુદ્ધ્યા શઙ્કરઃ સંયુનક્તુ ।
યો દેવાનામધિપો યસ્મિન્દેવા અધિશ્રિતાઃ ।

સ એવસર્વદેવેશઃ શઙ્કરઃ પરમા ગતિઃ ॥ ૨૦૯॥

યસ્મિન્સદાશિવો દેવાઃ દ્વિપદશ્ચ ચતુષ્પદઃ ।
તસ્મૈ દેવાય હવિષા શઙ્કરાયામિતાત્મને ॥ ૨૧૦॥

સૂક્ષ્માતિસૂક્ષ્મં કલિલસ્ય મધ્યે વિશ્વસ્ય સ્રષ્ટારં તમનેકરૂપમ્ ।
વિશ્વસ્યેશં પરિવેષ્ટિતારં જ્ઞાત્વા શિવં શાન્તિમત્યન્તમેતિ ॥ ૨૧૧॥

સ એવ કાલો ભુવમસ્ય ગોપ્તા વિશ્વાધિકઃ સર્વભૂતેષુ ગૂઢઃ ।
યસ્મિન્યુક્તા બ્રહ્મર્ષયો દેવતાશ્ચ તં વિજ્ઞાત્વા મૃત્યુપાશાંશ્છિનત્તિ ॥ ૨૧૨॥

શ઼ૃતાત્પરં મણ્ડમિવાતિસૂક્ષ્મં જ્ઞાત્વા શિવં સર્વભૂતેષુ ગૂઢમ્ ।
વિશ્વસ્યૈવં પરિવેષ્ટિતારં ઈશં જ્ઞાત્વા મુચ્યતે સર્વપાશૈઃ ॥ ૨૧૩॥

ય એવ દેવો વિશ્વકર્મા મહાત્મા સદા જનાનાં હૃદયે સન્નિવિષ્ટઃ ।
હૃદા મનીષા મનસાભિક્લૃપ્તો ય એવં વિદુરમૃતાસ્તે ભવન્તિ ॥ ૨૧૪॥

યદા સમસ્તં ન દિવા ન રાત્રિર્નસન્ન ચાસન્ શિવ એવ કેવલઃ ।
તદક્ષરં તત્સવિતુર્વરેણ્યં પ્રજ્ઞા ચ તસ્માત્પ્રસૃતાં પુરાણી ॥ ૨૧૫॥

ન સન્દૃશે તિષ્ઠતિ રૂપમસ્ય ન ચક્ષુષા પશ્યતિ કશ્ચ નૈનમ્ ।
હૃદા મનીષા મનસાભિક્લૃપ્તો ય એવં વિદુરમૃતાસ્તે ભવન્તિ ॥ ૨૧૬॥

ન તત્ર સૂર્યો ભાતિ ન ચન્દ્રતારકં નેમા ભાન્તિ વિદ્યુતઃ કુતોઽયમગ્નિઃ ।
તમેવ ભાન્તમનુભાતિ સર્વં તસ્ય ભાસા સર્વમિદં વિભાતિ ॥ ૨૧૭॥

એકો હંસો ભુવનસ્યાસ્ય મધ્યે સ એવાગ્નિઃ સલિલે સન્નિવિષ્ટઃ ।
તમેવં વિદિત્વા અતિમૃત્યુમેતિ નાન્યો હેતુર્વિદ્યતેઽયનાય ॥ ૨૧૮॥

નાતઃ પરં વેદ્યમચિન્ત્યરૂપં શિવાચ્ચ સામ્બાદદ્વયાદવૈમિ ।
શિવાત્મકં યચ્ચ સમસ્તમેતચ્છિવાન્ન કિઞ્ચિદ્વ્યતિરિક્તમસ્તિ ॥ ૨૧૯॥

અવિજ્ઞાય મહાદેવમચિન્ત્યવિભવં શિવમ્ ।
અમરા અપિ મુહ્યન્તિ કિમન્યે મનુજાધમાઃ ॥ ૨૨૦॥

અવમાન્ય તમેવેશં નિરયં યાન્તિ દુર્જનાઃ ।
સમ્માનયિત્વા તં દેવં પ્રયાન્તિ પરમં પદમ્ ॥ ૨૨૧॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શૈવપ્રોક્તઃ શિવસ્તવઃ સમ્પૂર્ણઃ ॥

- ॥ શ્રીશિવરહસ્યમ્ ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૪ । ૧૭૧-૨૨૧॥

- .. shrIshivarahasyam ugrAkhyaH saptamAMshaH . adhyAyaH 14 . 171-221 ..

Encoded and proofread by Ruma Dewan

*Shaivaproktа Shiva Stava*
pdf was typeset on April 28, 2024

Please send corrections to *sanskrit@cheerful.com*